देहस्य कन्दोस्त्युत्सेधायामाभ्यं चतुरङ्गुलः ।
ब्रह्मग्रन्थिरिति प्रोक्तं तस्य नाम पुरातनैः ॥ ३९ ॥

(38—39) Brahmagranthi the base of voice-production 12 angulas above the adhara chakra.
(1 angula = $\frac{3}{4}$" approximately)

(சு. 38—39) ஆதாரசக்கிரத்திற்குப் பன்னிரண்டு அங்குலத்துக்கு மேல் பிரஹ்மகிரந்தி இருக்கிறது. அதிலிருந்து கிளம்பும் வாயுவே நாதத்தை உண்டாக்குகிறது. 1 அங்குலம் = $\frac{3}{4}$ தற்கால அங்குலம்.

अथ वायवः ।

प्राणापानौ तथाव्यानसमानोदानसंज्ञकाः ।
नागः कूर्म चक्रकरोदेवदत्तधनञ्चयौ ॥ ४० ॥

तेषां मुख्यतमः प्राणो नाभिकन्दादधःस्थितः ।
चरत्यास्ये नासिकयोः नाभौहृदयपङ्कजे ॥ ४१ ॥

शब्दोच्चारण निश्वासोच्छ्वासकासादिकारणम् ।
अपानस्तुगुदे मेढ्रे कटि जङ्घोदरे तथा ॥ ४२ ॥

व्यानोऽक्षि श्रोत्र गुल्फेषु कट्याङ्घ्राणे च तिष्ठति ।
समानोव्याप्य सकलं शरीरं वह्निनासह ॥ ४३ ॥

उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु ।
त्वगादिधातूनाश्रित्य पञ्चनागादयः स्थिताः ॥ ४४ ॥

त्वगसृङ्मांसमेदोस्थि मज्जा शुक्राणि धातवः ।
हृदि प्राणो गुदेऽपानः समानो नाभिसंस्थितः ।
उदानः कण्ठ देशस्थः व्यानस्सर्वशरीरगः ॥ ४५ ॥

40–45 The ten Vayus and their places – the 7 dhatus

(சு. 40-45) பத்துவித வாயுக்களும், ஏழுதாதுக்களும்.

अथ प्रकृतम् ।

इति वस्तुस्थितिस्तावद्गाने त्रेधा भवेदसौ ।
हृदिमन्द्रो गले मध्यो मूर्ध्नि तार इति क्रमात् ॥ ४६ ॥

द्विगुणः पूर्वपूर्वस्मादयंस्यादुत्तरोत्तरः ।
एवं शरीरवीणायां दार्व्यां तु विपर्ययः ॥ ४७ ॥

स्वरूपमात्रश्रवणात् नादोनुरणनं विना ।
श्रुतिरित्युच्यते भेदास्तस्या द्वाविंशतिर्मताः ॥ ४८ ॥

तदभिव्यक्तये नाडि स्थितिर्देहे निरूप्यते ।
इडावामे स्थिता नाडी दक्षिणे पिङ्गला तथा ।
हृदिनाडी सुषुम्ना सा ब्रह्मरन्ध्रावधिस्थिता ॥ ४९ ॥

46—49. The seats of the octaves in the body; the 3 principal Nadis—Ida, Pingala and Sushumna.

(சு. 46—49) சரீரத்தில் 3 ஸ்தாயிகளின் ஸ்தானங்களும், சரீரத்திலுள்ள நாடிகளில் முக்கியமான நாடிகளாகிய 'இடை', 'பிங்கலை' 'ஸுஷும்நை' என்பவைகளும்.

अथ श्रुतयः ।

तीव्राकुमुद्वतीमन्दा छन्दोवत्यस्तु षड्जगाः ।
दयावती रञ्जनीं च रतिकाऋषभे स्थिताः ॥ ५० ॥

रौद्रीं क्रोधा च गान्धारे वज्रिका च प्रसारिणी ।
प्रतिश्रमार्जनीत्येता श्रुतयोमध्यमा श्रिताः ॥ ५१ ॥

क्षितीरक्ता च सन्दीपिन्यालापिन्यपिपञ्चमे ।
मदन्ती रोहिणीरम्येत्येता धैवतसंश्रयाः ॥ ५२ ॥

उग्रा च क्षोभिणीतिद्वे निषादे वसतः श्रुती ।
एवं गण्ठे तथाशीर्षे श्रुतिद्वाविंशतिर्मता ॥ ५३ ॥

(50—53) The Srutis, 22 in number, and their distribution in the 7 swaras.

(சு, 50–53) சுருதிகள் இருபத்திரண்டும், அவைகள் ஸ்வரங்களில் அமைந்திருக்கும் விதமும்.

अथ श्रुतिविवेकः ।

श्रुत्यनन्तरभावित्वं यस्यानुरणनात्मकः ।
स्निग्धश्चरञ्जकश्चासौ स्वरइत्यभिधीयते ॥ ५४ ॥

अथवा ।

स्वयं यो राजते नादः सस्वरः परिकीर्तितः ।
शुद्धाः सप्तस्वरा स्तेच मन्द्रादि स्थानतस्त्रिधा ॥ ५५ ॥

च्युताऽच्युतादिभेदेन विकृता द्वादशोदिताः ।
चतुःश्रुतिर्यदाषड्जो द्विश्रुतिर्विकृतस्तदा ॥ ५६ ॥

साधारणे च्युतः सस्यात् काकलीत्वेऽच्युतः स्मृतः ।
त्रिश्रुती ऋषभः साधारणे षांड्जोंश्रुतिंश्रितः ॥ ५७ ॥

चतुःश्रुतित्वं आपन्नः तदैको विकृतोभवेत् ।
साधारणे मध्यमस्य गान्धारस्त्रिश्रुतिर्भवेत् ॥ ५८ ॥

स्वस्या-तरत्वे भवति चतुःश्रुतिरिति द्विधा ।
च्युताच्युतादिभेदेन मध्यमोऽपिद्विधा भवेत् ॥ ५९ ॥

साधारणेन्तरत्वेच द्विश्रुतिर्विकृतस्तदा ।

पञ्चमो मध्यमग्रामे विश्रुतिर्जायतेस्वरः ॥ ६० ॥

मध्यमस्य श्रुतिं प्राप्य कैशिकोपि चतुःश्रुतिः ।

धैवतो मध्यमग्रामे विकृतः स्याच्चतुःश्रुतिः ॥ ६१ ॥

कैशिके काकलीत्वे च निषादस्त्रिचतुःश्रुतिः ।

एते च सप्तभिः शुद्धैः भवन्त्येकोनविंशतिः ॥ इति च रत्नाकरे ।

(54-62) The 7 Suddha swaras and 12 Vikrita swaras as formulated in Sangita Ratnakara.

(சு. 54—62) சங்கீத ரத்னாகரத்தில் சொல்லியிருக்கிறபடி 7 சுத்த ஸ்வரங்களும், 12 விக்ருத ஸ்வரங்களும்.

चतुर्विधाः स्वरा वादी संवादी च विवाद्यपि ।

अनुवादी च वादीतु प्रयोगे बहुलःस्वरः ॥ ६३ ॥

वाद्यादिभेदभिन्नाश्चतुर्विधास्ते स्वराः कथिताः ।

रागोत्पादनशक्तिर्वादनं तद्योगतोवादी ॥ ६४ ॥

बहुलस्वरः प्रयोगे समवति राजा च सर्वेषाम् ।

श्रुतयोष्टौ द्वादशवा भवन्तिमध्ये ययोः स्वरयोः ॥ ६५ ॥

संवादिनौ तु कथितौ परस्परं तौ निषादगान्धारौ ।

रि धयो विवादिनौस्तः तयोरिधौवा विवादिनौस्याताम् ॥६६॥

शेषाणामनुवादित्वं स्वराणामुपजायते ।

वादी राजा स्वरस्तस्य संवादी स्यादमात्यवत् ।

शत्रुर्विवादी तस्यस्यात् अनुवादीतुभृत्यवत् ॥ ६७ ॥

इति वाद्यादिभेदाः ।

(63-67) Vadi, Samvadi (consonant) Anuvadi (assonant) & Vivadi (dissonant) Swaras, – a classification necessary in the formation of Ragas.

(சு. 63—67) ராகங்களை அமைப்பதற்கு வேண்டிய ஸ்வரங்களின் வகை :—

வாதி (முக்கிய ஸ்வரம்), ஸம்வாதி (கிளை ஸ்வரம்), விவாதி (பகை ஸ்வரம்), அனுவாதி (நட்பு ஸ்வரம்).

ग्राम: स्वरसमूह:स्यात् मूर्छनादे:समाश्रय: ।
नौद्वौधरातले तत्र स्यात्षड्जग्राम आदिम: ॥ ६८ ॥

द्वितीयो मध्यमग्रामस्तयोर्लक्षणमुच्यते ।
षड्जग्राम: पञ्चमेस्वचतुर्थ: श्रुतिसंस्थिते ॥ ६९ ॥

स्वोपान्त्यश्रुतिसंस्थेस्मिन् मध्यमग्राम इष्यते ।
यद्वाधस्त्रिश्रुति: षड्जे मध्यमे च चतु:श्रुति: ॥ ७० ॥

रिमयो: श्रुतिमेकैकां गान्धारश्च समाश्रयेत् ।
पश्रुतिधोनिषादस्तु धश्रुतिं सश्रुतिश्रित: ॥ ७१ ॥

गान्धारग्राममाचष्टे नदातं नारदोमुनि: ।
प्रवर्तते स्वर्गलोके ग्रामोसौ न महीतले ॥ ७२ ॥

षड्ज:प्रधान आद्यत्वादमात्याविक्यतस्तथा ।
ग्रामेस्यादविलोपित्वात् मध्यमस्तुपुरस्सर: ।
एतत्कुलप्रसूतत्वात् गान्धारोंप्यग्रणीर्दिवि ॥ ७३ ॥

(68-73) The 3 Gramas and their characteristics.

(சு. 68—73) 3 க்ராமங்கள் என்னும் ஸ்வரத் தொகுதிகளும் அவற்றின் லக்ஷணங்களும்.

गीर्वाण कुलसम्भूताः षड्जगान्धारमध्यमाः ।
पञ्चमः पितृवंशोत्थो रिधवृषि कुलोद्भवौ ॥ ७४ ॥

निषादोऽसुखंशोत्थो ब्राह्मणौः समपञ्चमाः ।
रिधौ तु क्षत्रियौज्ञेयौ वैश्यजाती निगौ मतौ ।
शूद्रावन्तरकाकल्पौ क्रमेण कथिता बुधैः ॥ ७५ ॥

(74-75) The tribe and caste of swaras.

(சு. 74—75) ஸ்வரங்களின் குலமும் ஜாதியும்

इति ग्रामलक्षणम् ।

क्रमात्स्वराणां सप्तानां आरोहश्चावरोहणम् ।
मूर्छनेत्युच्यतेग्रामत्रये ताः सप्त सप्त च ॥ ७६ ॥

स्थानत्रयसमायोगे मूर्छनारम्भसम्भवः ।
तत्र मध्यस्थषड्जेन षड्जग्रामस्य मूर्छना ॥ ७७ ॥

प्रथमारभ्यतेन्यास्तु निषादाद्यैरघस्तनैः ।
मध्यमध्यममारभ्य मध्यमग्राममूर्छना ॥ ७८ ॥

आद्यान्यास्तदधोधस्थ स्वरानारभ्यषट्क्रमात् ।
षड्जेतूत्तरमन्द्राद्या रजनीचोत्तरायता ॥ ७९ ॥

शूद्धषड्जामत्सरीकृदश्वक्रान्ताभिरुद्गता ।
सौवीरीमध्यमग्रामे हरिणाश्वा ततःपरा ॥ ८० ॥

स्यात्कलोपनता शुद्धमध्यामार्गी च पौरवी ।
हृष्यका सप्तमी प्रोक्ता मूर्छनेत्यभिधा इमाः ॥ ८१ ॥

नन्दा विशाला सुमुखी विचित्रारोहिणी सुखा ।

आलापाचेतिगान्धारग्रामेस्युः सप्तमूर्छना: ॥ ८२ ॥

ताश्च स्वर्गे प्रयोक्तव्या विशेषादत्रनोदिताः ।

पृथक् चतुर्विधाः शुद्धाः काकलीकलितास्तथा ।

सान्तारास्तद्द्वयोपेताः षट्पंचाशत्तुमूर्छना: ॥ ८३ ॥

(76-83) Moorchhanas (modes) for each grama. 28 in number, made up of 7 Suddha. 7 with Kakali, 7 with antara and 7 with both – 56 for both the gramas.

(சு. 76—83) மூர்ச்சனைகள், ஒவ்வொரு கிராமத்திற்கும் சுத்த மூர்ச்சனைகள் 7, அந்தர ஸ்வரத்தோடு கூடியது 7 காகலி ஸ்வரத்தோடு கூடியது 7, இரண்டும் கூடியது 7, ஆக இரண்டு கிராமங்களுக்கும் 56.

यदा निषादसंज्ञकः श्रुतिद्वयं समाश्रयेत् ।

तदूर्ध्वसस्य काकली तदा स कीर्त्यते बुधैः ॥ ८४ ॥

यदा श्रयतिगान्धारो मध्यमस्य श्रुतिद्वयम् ।

तदा सावन्तरः प्रोक्तः मुनिभिक्रतुसन्धिवत् ॥ ८५ ॥

(84-85) 'Kakali' and 'Antara' defined.

(சு. 84-85) 'காகலி' 'அந்தரம்' என்ற ஸ்வரங்களின் லக்ஷணம்.

मूर्छनायां यावतिथौ भवेतां षड्जमध्यमौ ।

ग्रामयोस्तावतिथ्येव मूर्छना सा प्रकीर्तिता ॥ ८६ ॥

(86) Order of Moorchhnas.

(சு. 86) மூர்ச்சனைகளின் வரிசை.

प्रथमादिस्वरारम्भादेकैका सप्तधाभवेत् ।
तासूच्चार्यान्त्यस्वरांस्तान् पूर्वानुच्चारयेत्क्रमात् ।
ते क्रमाः कथितास्तेषां सङ्ख्यानेकतर मता ॥ ८७ ॥

(87) Kramas, 7 for each moorchhana

(சு. 87) கிரமங்கள், ஒவ்வொரு மூர்ச்சனைக்கும் 7.

यदा तु मूर्छनाः शुद्धाः षाडवौडवीतिकृताः ।
तदा तु शुद्धतानाःस्युः मूर्छनास्तत्र षड्जगाः ॥ ८८ ॥

सप्तक्रमाद्यदाहीनाः स्वरैः सरिपसप्तमैः ।
तदाऽष्टाविंशति स्तानाः षाडवाः परिकीर्तिताः ॥ ८९ ॥

यदातुमध्यमग्रामे मूर्छनाः सरिगोज्झिताः ।
सप्तक्रमाद्यदातानाः स्युस्तदात्वेकविंशतिः ॥ ९० ॥

एवमेकोनपञ्चाशन्मिलिताः षाडवा मताः ।
सपाभ्यां द्विश्रुतिभ्यां च रिपाभ्यां सप्तवर्जिताः ॥ ९१ ॥

षड्जग्रामे पृथक् ताना एकविंशतिरौडवाः ।
त्रिश्रुतिभ्यां द्विश्रुतिभ्यां मध्यमग्राममूर्छनाः ॥ ९२ ॥

यदाहीनास्तदातानाः चतुर्दश समीरिताः ।
औडवामिलिताः पञ्च त्रिशद्ग्रामद्वयेस्थिताः ।
सर्वे चतुरशीतिःस्युः मिलिताः षाडवौडवाः ॥ ९३ ॥

इति शुद्धतान विवेकः ॥

(88-93) Suddha Tanas, 84 in number.

(சு. 88—93) சுத்த தானங்கள் 84.

असम्पूर्णाश्चसंपूर्णाःव्युत्क्रमोच्चारिताः स्वराः ।
मूर्छनाः कूटतानाःस्युः तासां सङ्ख्याभिधीयते ॥ ९४ ॥

पूर्णाः पञ्चसहस्त्राणि चत्वारिंशद्युतानि च ।
एकैकस्यां मूर्छनायां कूटतानास्सह क्रमैः ॥ ९५ ॥

षट्पञ्चाशन्मूर्छनाःस्युः पूर्णाः कूटास्तु योजिताः ।
लक्षद्वयं सहस्त्राणि द्यशीतिर्द्विशते तथा ॥ ९६ ॥

चत्वारिंशच्च संख्याताः अथापूर्णान्प्रचक्ष्महे ।
एकैकान्त्यान्त्यविरहाभेदाः षट् षट्स्वरादयः ॥ ९७ ॥

एकस्वरोत्र निर्भेदोप्युक्तो नष्टादिसिद्धये ।
क्रमाश्चकूटतानत्वेप्युक्तास्तेप्युपयोगिनः ॥ ९८ ॥

स्युः षाडवानां विंशत्या सह सप्तशतानि च ।
औडवानांन्तु विंशत्या सहितं शतमुच्यते ॥ ९९ ॥

चतुःस्वराणां कूटानां चतुर्विंशतिरीरिताः ।
त्रिस्वराःषट् द्विस्वरौद्वौ एक एकस्वरोमतः ॥ १०० ॥

आर्चिकोगाथिकश्चैव सामिकोथ स्वरान्तरः ।
एकस्वरादितानानां चतुर्णामभिधा इमाः ॥ १०१ ॥

उक्तशुद्धादिभेदेन निगयुक्ताश्चतुर्विधाः ।
तयोरेकैकहीनास्तु द्वेधामूलक्रमामताः ॥ १०२ ॥

षड्जाद्यौ मध्यमाद्यौ द्वौ चत्वारःस्युर्द्विधा द्विधा ।
चतुर्धान्ये दशेत्यष्टाचत्वारिंश दमीक्रमाः ॥ १०३ ॥

सविंशतिस्सप्तशतीं प्रागुक्तागुणिता क्रमैः ।
चतुस्त्रिंशत्सहस्त्राणि षष्टचापञ्चशतानि च ॥ १०४ ॥

इति षाडवसंख्यास्यादथ पञ्चस्वरान्ब्रुवे ।
गाद्यौ निषादाद्यौ चतुर्भेदाः षडौडवाः ॥ १०५ ॥

अष्टावन्ये द्विधात्वेवं चत्वारिंशदिमे क्रमाः ।
सविंशतौ शतेतैश्च गुणितेऽष्टौ शतानिच ॥ १०६ ॥

चत्वारि च सहस्राणि संख्या पञ्चस्वरेष्विति ।
चतुःस्वरेषु न्याद्यौ द्वौ चतुर्धा द्वादशापरे ॥ १०७ ॥

क्रमाद्विधेति द्वात्रिंशच्चतुर्विंशतिताडिताः ।
शतानि सप्ताष्टषष्टचा चतुःस्वरस्सुसंमितिः ॥ १०८ ॥

त्रिस्वरेषु तु माद्यौ द्वावभेदौ द्वादशापरे ।
द्विधा षड्विंशतिरिति क्रमोस्ते षड्भिराहताः ॥ १०९ ॥

षट्पञ्चाशच्छतंचस्युः द्विस्वरेषु पुनर्द्विधा ।
रिगधन्यादयोष्टौस्युः शुद्धाः षडितरे क्रमाः ॥ ११० ॥

द्वात्रिंशतिस्ते च चतुश्चत्वारिंशद्विताडिताः ।
एकस्वरास्त्वभेदत्वान्मौला एव चतुर्दश ॥ १११ ॥

षड्जादेः शुद्धमध्याया। भेदकं पञ्चमं विना ।
चतुः स्वरे क्रमद्वंद्वेऽष्टाचत्वारिंशदीरिता ॥ ११२ ॥

तानास्त्रिस्वरयोस्त्वेते द्वादशा द्विस्त्वरे द्वयम् ।
एक एकस्वरस्तेत्रिषष्टि रौत्ररमन्द्रकैः ॥ ११३ ॥

पुनरुक्तामतास्तानां न्यादि मार्गी क्रमात्पुनः ।
पञ्चस्वरा ये चत्वारः तत्तानानां चतुःशती ॥ ११४ ॥

अशीत्यभ्यधिका चातुस्वरी षण्णवतिर्भवेत् ।
द्वादश त्रिस्वद्वंद्वे चत्वारो द्विस्वरद्वये ॥ ११५ ॥

एक एकस्वरस्तानः तेषां पञ्चशतीत्वियम् ।
त्रिनवत्यायुतातानैः अभिन्नारजनीगतैः ॥ ११६ ॥

धैवतादेस्तु पौरव्याश्चत्वारः षट्स्वराः क्रमात् ।
तत्तानानान्तु साशीतिशताष्टाविंशतिर्मता ॥ ११७ ॥

औडवानां चतुर्णां प्रागुक्ता संख्या चतुःस्वरौ ।
त्रिस्वरौद्विस्वरावेकस्वरः प्रागुक्त संख्यकाः ॥ ११८ ॥

पञ्चविंशति संयुक्ता चतुर्स्तशच्छतीत्वियम् ।
तानानां सद्दृशाकारा स्यात्तानै रौत्तरायतैः ॥ ११९ ॥

इत्येकाशीतिसंयुक्तं सहस्राणां चतुष्टयम् ।
तानानां पुनरुक्तानां पूर्णापूर्णैः सह क्रमैः ॥ १२० ॥

अपनीयेतचेदेषाकूटतानमितिर्भवेत् ।
लक्षत्रयं सप्तदश सहस्राणि शतानि च ।
नवत्रिंशद्युतानीति कूटतानमितिर्भवेत् ॥ १२१ ॥

इति कूटतान प्रकरणम् ॥

(93—121) Koota tanas, (i.e.) tanas formed by notes arranged out of order, and their total number arrived at by calculation.

(சு. 93-121) கூடதானங்களும் (வரிசை மாறிய ஸ்வரங்களால் உண்டானவை) அவைகளின் மொத்தத் தொகையின் கணக்கும்.

संख्याज्ञान प्रकारस्तु सांप्रतं कथयिष्यते ।
अङ्कानेकादि सप्तान्तानूर्ध्वमूर्ध्वं लिखेत्ततः ॥ १२२ ॥

हते पूर्वेण पूर्वेण तेषुचाङ्के परे परे ।
एकस्वरादितानानां संख्या सञ्जायते क्रमात् ॥ १२३ ॥

द्विस्वरं त्रिस्वरं वापि चतुःस्वरमथापि वा ।
क्रमं कञ्चिद्विलिख्यादौ पूर्वः पूर्वः परादधः ॥ १२४ ॥

स्वरः स्थाप्यः स चेदग्रे तत्पूर्वस्तदधोभवेत् ।
पुरतोऽपि लिखेद्धीमान् स्वरानुपरिवर्तिनः ।
मूलक्रमःक्रमात्पृष्ठे शेषः प्रस्तारईदृशः ॥ १२५ ॥

(122—125) Sankhya or the table of prastara or orderly formulation of the permutation and combination of swaras in tanas.

(சு. 122-125) 'சங்கியை' அல்லது வரிசையாகத் தானங்களை ப்ரஸ்தாரம் செய்யும் வழி.

नष्टोद्दिष्टप्रबोधार्थं खण्डमेरुस्तथोच्यते ।
सप्तकोष्ठाल्लिखेदाद्यां पङ्क्तिमेकाङ्क कोष्ठतः ॥ १२६ ॥

हीनं तु पूर्वं पूर्वस्मात् पङ्क्तिषट्कमधो लिखेत् ।
आद्यपङ्क्त्यादि कोष्ठे तु लिखेदेकं परेषुखम् ॥ १२७ ॥

द्वितीयपङ्क्त्यामप्येकं आद्यकोष्ठे लिखेद्बुधः ।
परेषु पूर्वपूर्वाङ्ककोष्टसंख्यागुणं न्यसेत् ॥ १२८ ॥

एवमेवलिखेदङ्कमधोधः पङ्क्तिकोष्ठकम् ।
खण्डमेरुरयं प्रोक्तः नष्टोद्दिष्टप्रबोधकः ॥ १२९ ॥

वेद्यतानस्वरमितान् दत्वा शून्येषु लोष्टकान् ।
मूलक्रमं लिखित्वादौ उद्दिष्टं तदधोलिखेत् ॥ १३० ॥

स्वरान्मूलक्रमस्यान्त्यात् पूर्वोयावतिथः स्वाः ।
उद्दिष्टान्त्यस्तावतिथे कोष्ठाधो लोष्टकं क्षिपेत् ॥ १३१ ॥

लोष्टचालनमन्त्यात्स्या ल्लब्धंत्यत्यक्त्वा क्रमो भवेत् ।
समश्चे दन्तिमोऽन्येन सोपित्याज्यः प्रयत्नतः ॥ १३२ ॥

१	०	०	०	०	०	०
	१	२	६	१४	१२०	७२०
		४	१२	४८	२४०	१८००
			१८	७२	३५०	२१६०
				९६	४८०	२८८०
					६००	३६००
						४३२०

लोष्टक्रान्तांकसंयोगात् उद्दिष्टस्यमितिर्भवेत् ।
सङ्ख्याया तु यदारूपे पृष्टे नष्टं तदुच्यते ॥ १३३ ॥

यैरङ्कैर्नष्टसङ्ख्यास्यात् मौलेकाङ्कसमन्वितः ।
नष्टतानस्वरस्थानं तैर्ज्ञात्वा तं स्वरं लिखेत् ॥ १३४ ॥

क्रमोऽत्रापि च कर्तव्यः लब्ध्वा त्यागेन पूर्ववत् ।
तथैवात्र लिखेच्छिष्टमेवं नष्टोत्तरं भवेत् ॥ १३५ ॥

तानस्वरमितोर्ध्वाधः पङ्क्तिगान्त्यांकमिश्रणात् ।
एकस्वरादितानानां सङ्ख्यासंजायते स्फुटम् ॥ १३६ ॥

इति खण्डमेरु नष्टोद्दिष्ट प्रकरणम् ॥

(126-136) Khanda meru or the table for 'Uddishta' or finding the order of any particular tana, and for 'Nashta' or finding the form of a tana of a particular order.

(சு. 126–136) 'கண்டமேரு' - அல்லது 'நஷ்டம்' 'உத்திஷ்டம்' என்பவைகளுக்கான வழி. அதாவது தானம் எத்தனையாவது என்று சொல்லி அதன் உருவத்தைக்கண்டு பிடித்தலும், தானத்தின் உருவத்தைச் சொல்லி அது எத்தனையாவது என்று கண்டுபிடித்தலும்.

अथ साधारणम् ।

साधारणं भवेद्द्वेधा स्वरजाति विशेषणात् ।
स्वरसाधारणं तत्र चतुर्धा परिकीर्तितम् ॥ १३७ ॥

काकल्यन्तरषड्जैश्च मध्यमेन विशेषणात् ।
अन्तरस्यापि गमयोरेवं साधारणं मतम् ॥ १३८ ॥

निषादोयदिषड्जस्य श्रुतिमाद्यां समाश्रयेत् ।
ऋषभश्चान्तिमां प्रोक्तं षड्जसाधारणं तदा ।। १३९ ।।

मध्यमस्यापि गमयोः एवं साधारणं मतम् ।
रागालापनसंयुक्तं जाति साधारणं विदुः ।। १४० ।।

इति साधारण प्रकरणम् ॥

(137—140) Sadharana or common feaured Swaras and Jatis :-

Swaras :-
(1) antara, (2) Kakali, (3) Shadjasadharana & (4) Madhyama sadharana.

Jatis :-
Mixed Jatis, discribed later.

(சு. 137–140) 'சாதாரணம்' அல்லது ஒன்றுக்கு மேற்பட்ட ஸ்வரங்களின் குணங்களையுடைய ஸ்வரங்களும் ஒன்றுக்கு மேற்பட்ட ஜாதிகளின் குணங்களுடைய ஜாதிகளும் :-

சாதாரண ஸ்வரங்கள் :- (1) அந்தரம், (2) காகலி, (3) ஷட்ஜ சாதாரணம், (4) மத்யம சாதாரணம்.

சாதாரண ஜாதிகள் :- பிந்தி விவரிக்கப்பட்டிருக்கின்றன.

गानक्रियोच्यते वर्णः सचतुर्धानिरूपितः ।
स्थाय्यारोह्यवरोही च संचारींचाथलक्षणम् ।। १४१ ।।

स्थित्वास्थित्वा प्रयोगः स्यात् एकैकस्य स्वरस्ययः ।
स्थायी वर्णः सविज्ञेयः परावन्वर्थ नामकौ ॥

एतत्संमिश्रणाद्वर्णः सञ्चारी परिकीर्तितः ।

अथवा ।

यत्रोपविशतेरागः स्वरःस्थायी स कथ्यते ॥ १४२ ॥

इति स्थाय्यादिवर्णलक्षणम् ॥

(141-142) 'Varna' or musical effort, 4 in numbers; as cent, descent, going up & down and staying in a note.

(சு. 141–142) 'வர்ணம்' அல்லது கானக்ரியை. இது 4 வகை :– ஆரோகி, அவரோகி, சஞ்சாரி, ஸ்தாயி — அதாவது ஏறுதல், இறக்குதல், மேலும் கீழும் செல்லுதல், ஒரே இடத்தில் நிற்றல்.

गीतादौस्थापितो यस्तु सग्रहस्वर उच्यते ।

इति ग्रहस्वरः ।

न्यासस्वरस्तु विज्ञेयः यस्तु गीतसमापकः ।

इति न्यासस्वरः ।

वहुलत्वं प्रयोगेषु सं अंशस्वरं उच्यतें ॥ १४३ ॥

इति अंशस्वरः ।

(143)- 'Graha' or the note with which tune starts, 'Nyasa' or the 'finale' and 'Amsa' or the dominant note of the tune, or the note most freeuenthy used.

(சு. 143) 'க்ரஹ ஸ்வரம்' அல்லது ராகம் ஆரம்பிக்கும் ஸ்வரம்; 'நியாஸ ஸ்வரம்' அல்லது ராகம் முடியும் ஸ்வரம்; 'அம்ச ஸ்வரம்' அல்லது ராகத்தின் முக்கிய ஸ்வரம் அல்லது ராகத்தில் அடிக்கடி உபயோகிக்கப்படும் ஸ்வரம்.

विशिष्टवर्णसन्दर्भमलङ्कारं प्रचक्षते ।

एकैकस्यां मूर्छनायां त्रिषष्टिरुदिताबुधैः ॥ १४४ ॥

अथ अलङ्कारप्रस्तारः ।

सरि सरिग रिग रिगम गम गमप ।

मप मपध पध पधनि धनि धनिस । इति प्रथमः ।

सस रिरि गग मम पप धध निनि सस ।

इतिद्वितीयः ॥ १४५ ॥

इति अलङ्कारलक्षणम् ॥

(144-145) Alankaras or graceful varicty in the four forms of musical effort.

(சு 144–145) 'அலங்காரங்கள்' அல்லது வர்ணங்களின் அழகிய வகைகள்.

ग्रहांशतारमन्द्राश्च न्यासापन्यासकौ तथा ।

अपि सन्यासविन्यासौ बहुत्वं चाल्पना ततः ॥ १४६ ॥

इति राग लक्षणम् ॥

(146) The function of swaras in the formation of Ragas :-

Graha (Initial note) Amsa (Dominant note) Tara-(Highest note) Mandra (Lowest note) Nayasa (Final note) Apanyas (notes for Staying) Sanyasa & Vinyasa (notes for beginning & ending of parts of a musical piece)

(சு. 146) ராகத்தின் முக்கிய ஸ்வரங்கள் :—

கிரஹம் (ஆரம்பிக்கும் ஸ்வரம்). அம்சம் (முக்கிய ஸ்வரம்), தாரம் (ராகத்தின் மேல்கோடி), மந்த்ரம் (கீழ் கோடி), நியாஸம் (முடிக்கும் ஸ்வரம்), அபந்நியாஸம் (இடையே நிற்கும் ஸ்வரம்), ஸந்நியாஸ - விந்நியாஸம் (ராகப் பகுதிகளில் ஆரம்பம், முடிவு).

अथ स्वरा उच्यन्ते ।

श्रुतिभ्यः स्युः स्वराः षड्जऋषभगान्धारमध्यमाः ।
पञ्चमोधैवतश्चेति निषाद इति सप्त ते ।
तेषां संज्ञासरिगम पधनीत्यपरामताः ॥ १४७ ॥

षड्जं वदति मयूरः स्वरमृषभं चातको ब्रूते ।
गान्धाराख्यं छागो निगदति पक्षी मध्यमं क्रौञ्चः ॥ १४८ ॥

गदति पञ्चम मञ्चितबाक् पिको
रटति धैवतमुन्मद दर्दुरः ।
सृणिसमाहत मस्तक कुञ्जरो
गदति नासिकया स्वर मन्तिमम् ॥ १४९ ॥

मयूरचातक छाग क्रौञ्च कोकिल दर्दुराः ।
गजश्च सप्तषड्जादीन् क्रमादुच्चारयन्त्यमी ॥ १५० ॥

इति चतुरदामोदरविरचिते सङ्गीतदर्पणे स्वराध्यायः ॥

(147—150) The Seven notes and the corresponding sounds in nature.

(147—150) ஏழுஸ்வரங்களும் அவற்றை ஒலிக்கும் பிராணிகளும்.

अथ रागाध्यायः ।

योऽयं ध्वनिविशेषः स्यात् स्वखर्णंत्रिभूषितः ।
रञ्जको जनचित्तानां सरागः कथितो बुधैः ॥ १५१ ॥

अथ रागाङ्ग भाशाङ्ग क्रियाङ्गोपाङ्गनिर्णयः ।
रागछायानुकारित्वात् रागाङ्गमिति कथ्यते ॥ १५२ ॥

भाषांगं भाषाच्छाया(या) भाषांगस्थेन हेतुना ।
करुणोत्साहसंयुक्तः क्रियांगस्तेनहेतुना ॥ १५३ ॥

इति रागांग भाषांग क्रियांग विवेकः ॥

(151—153) "Raga", its defination and its kinds namely (1) Raga, (2) Bhasha, (3) Raganga, (4) Bhashanga and Kriyanga.

(சு 151–153) "ராகம்" என்றால் என்ன ?

அதன் வகைகள் :- (1) ராகம், (2) பாஷை, (3) ராகாங்கம், (4) பாஷாங்கம், (5) க்ரியாங்கம்.

काण्डारणा तु कथिता तारस्थानेतिगोचरता ।
गमकैर्विधैर्युक्ता कौशल्यसहिता मता ॥ १५४ ॥

इति काण्डरणा ॥

(154) "Kandara" or the tremulo and other graces in the higher octaves.

(சு. 154) "காண்டாரணை" அல்லது மேல் ஸ்தாயியில் கமகங்கள் நிறைந்த துரித சஞ்சாரம்.

अथ मतङ्गमतेन रागाणां त्रैविध्यं दर्शयति ।
"शुद्धाः छायालगाः प्रोक्ताः सङ्कीर्णाश्च तथैव च" ॥ १५५ ॥

तत्र शुद्धरागत्वं नाम शास्त्रोक्तनियमाद्रंजकत्वं भवति । छायालगरागत्वं नाम अन्यछायानुलगत्वेन रक्तिहेतुत्वम् । सङ्कीर्णरागत्वं नाम शुद्धछायालगमुख्यत्वेन रक्तिहेतुत्वम् ॥

इति कल्लिनाथोक्तं लिखितम् ॥

(155–156) The 3 kinds of Ragas according to Matanga :— Suddha, Chhayalaga and Sankirna.

The Ist kind follows the classical rules of the ancient texts.

The 2nd kind makes a slight deviation while following in the main, the path of the Suddha ragas.

The 3rd kind is formed with the help of the ragas of the Ist and 2nd kind.

(சு. 155–156) மாதங்கர் சொல்லியபடி ராகங்களின் வகை :—

(1) சுத்தம் (சாஸ்திரப்படி அமைந்தவை).

(2) சாயாலகம் (சிறிது மாறியவை),

(3) சங்கீர்ணம் (முதல் இரண்டு வகையும் கலந்தவை)

औडवः पञ्चभिः प्रोक्तः स्वरैः षड्भिस्तु षाडवः ।
सम्पूर्णः सप्तभिर्ज्ञेयस्त्वेवं रागस्त्रिधामतः ॥ १५६ ॥

(157) Classification according to the No. of swaras occurring in the raga :–

(1) Sampurna (7 swaras).
(2) Shadava (6 „
(3) Oudava (5 „

(சு. 157) ராகங்களிலுள்ள ஸ்வரங்களின் எண்ணிக்கையைப் பொறுத்து ராகங்களின் வகை :—

(1) ஸம்பூர்ணம் (7 ஸ்வரங்கள்)
(2) ஷாடவம் (6 „)
(3) ஔடவம் (5 „)

श्रीराग नट्टौ वङ्गालो भासमध्यम पाडवौ ।
रक्तहंसः कोल्लहासः प्रसभो भैरवध्वनिः ॥ १५७ ॥

मेघरागः सोमरागः काम्बोदश्चाम्रपञ्चमः ।
स्यातां कन्दर्पदेशाख्यौ ककुभान्तश्च कैशिकः ॥ १५८ ॥

नट्ठनारायणश्चेति रागविंशतिरीरिताः ॥ १५९ ॥

(158-159) The well known classical Ragas 20 in number.

(சு. 158—159) 20 பழைய பிரசித்த ராகங்கள்.

अथ रागारागिणीमतम् ।

शिवशक्तेः समायोगात् रागाणां सम्भवो भवेत् ।
पञ्चास्यात् पञ्चरागाःस्युः षष्ठस्तु गिरिजामुखात् ॥ १६० ॥

सद्योवक्त्रात्तु श्रीरागो वामदेवाद्वसन्तकः ।
अघोराद्भैरवो जातः तत्पुरुषात्तु पञ्चमः ॥ १६१ ॥

ईशानाख्यान्मेघरागो नाट्यारम्भे शिवादभूत् ।
गिरिजाया मुखाल्लास्ये नट्टनारायणोऽभवत् ॥ १६२ ॥

"केरागाः काश्चरागिण्यः कावेला ऋतवश्चके ।
किंरूपं कथमुद्धारः वद देव प्रसादतः" ॥ १६३ ॥

श्रीरागोऽथ वसन्तश्च भैरव- पञ्चमस्तथा ।
मेघरागो वृहन्नाटः षडेते पुरुषाह्वयाः ॥ १६४ ॥

इति षड्पुरुषरागाः ॥

अथ रागिण्यः ।

मालवी त्रिवणी गौडी केदारी मधुमाधवी ।
ततः पाहाडिकाज्ञेया श्रीरागस्य वराङ्गनाः ॥ १६५ ॥

देशी देवगिरी चैव वराटी टोडीका तथा ।
ललिताचाथ हिन्दोली वसन्तस्य वराङ्गनाः ॥ १६६ ॥

भैरवी गुर्जरीचैव रेवा गुणकरी तथा ।
वङ्गाली बहुलीचैव भैरवस्य वराङ्गनाः ॥ १६७ ॥

विभासश्चाथ भूपाली कर्णाटी वडहंसिका ।
मालवश्रीपढमञ्जर्या सहिताः पञ्चमाङ्गनाः ॥ १६८ ॥

मल्लारी सोरटी चैव सावेरी कौशिकी तथा ।
गान्धारी हरिश्शृङ्गारा मेघरागस्य योषितः ॥ १६९ ॥

कामोदी चैव कल्याणी आभेरी नाटिका पुनः ।
सालङ्गी नट्टहंजी(वी)रा नटनारायणाङ्गनाः ॥ १७० ॥

इति षड्रिगश्चाद्रागिण्यः ॥

(160-170) Classification of Ragas into masculine and femminine :-

(1) Someswara's Classification :- 6 'Ragas' or masculine tunes, each having 6 'Raginis' or consorts.

(சு. 160-170) ராகங்களின் பாகுபாடு :—

(1) ஸோமேசுவரரின் மதப்படி புருஷ ராகங்கள் 6ம், ஒவ்வொன்றுக்கும் 6 ஸ்திரீகளாகிய ராகிணிகளும்.

अथ रागवेळाः ।

मधुमाधवी च देशाख्या भूपाली भैरवी तथा ।
बेलावली च मल्हारी वङ्गाली साम गुर्जरी ॥ १७१ ॥

धनाश्री मालवश्रीश्च मेघरागश्च पञ्चमः ।
देशांको भैरवश्च ललितश्च वसन्तकः ॥ १७२ ॥

एते रागाः प्रगीयन्ते प्रातरारभ्यनित्यशः ।
गुर्जरो कौशिकश्चैव सावेरी पढमञ्जरी ॥ १७३ ॥

रेवा गुणकरी चैव भैरवी रामकर्यपि ।
सोरटीं च तथा गेया प्रथमप्रहरोत्तरम् ॥ १७४ ॥

वैराटी टोडिकाचैव कामोदी च कुडायिका ।
गान्धारी नागशब्दी च तथा देशी विशेषतः ॥ १७५ ॥

शङ्कराभरणो ज्ञेयो द्वितीयप्रहरात्परम् ।
श्रीरागो मालवाख्यश्च गौडी त्रिवर्णसंज्ञकः ॥ १७६ ॥

नटकल्याणसंज्ञश्च सालङ्गं नट्टकं तथा ।
सर्वे नाटाश्च केदारी कर्णाटचाभीरिका तथा ॥ १७७ ॥

बडहंसी पहाडी च तृतीय प्रहरात्परम् ।
अर्धरात्रावधिर्गेया रागा एते सुखप्रदाः ॥ १७८ ॥

यथोक्तकाल एवैते गेयाः पूर्वं विधानतः ।
राजाज्ञया सदागेया ननु कालं विचारयेत् ॥ १७९ ॥

इति रागवेळा ॥

श्रीरागो रागिणीयुक्तः शिशिरे गीयते बुधैः ।
वसन्तस्स्वसहायैस्तु बसन्ततौ प्रगीयते ॥ १८० ॥

भैरवां स्वसहायैस्तु ऋतौ ग्रीष्मे प्रगीयते ।
पञ्चमस्तु तथागेयो रागिण्या सह शारदे ॥ १८१ ॥

मेघरागो रागिणीभिः युक्तोवर्षासुगीयते ।
नट नारायणरागो रागिण्यासहहेमके ।
यथेच्छया वा गातव्याः सर्वर्तुषु सुखप्रदाः ॥ १८२ ॥

इति ऋतुवेला सोमेश्वरमतम् ।

(171—182) The proper time of the day and the season for particular Ragas.

(சு. 171—182) ராகங்களுக்குத் தகுதியான வேளையும், ருதுவும்.

अथ हनूमन्मतम् ।

भैरवो कौशिकश्चैव हिन्दोलो दीपकस्तथा ।
श्रीरागो मेघरागश्च षडेते पुरुषाह्वयाः ॥ १८३ ॥

मध्यमादिभैरवी च वङ्गाली च वराटिका ।
सैन्धवी च पुनर्गेया भैरवस्य वराङ्गनाः ॥ १८४ ॥

टोडी खभावती गौडी गुणक्री ककुभा तथा ।
रागिण्यो रागराजस्य कौशिकस्य वराङ्गनाः ॥ १८५ ॥

वेलावली रामकरी देशाख्या पढमञ्जरी ।
ललिता सहिता एता हिन्दोलस्य वराङ्गनाः ॥ १८६ ॥

केदारी कानडा देशी कामोदी नाटिका पुनः ।
दीपकस्य प्रियाः पञ्च ख्याता रागविशारदैः ॥ १८७ ॥

वसन्ती मालती चैव मालश्रीश्च धनाश्रिका ।
असावेरीति विज्ञेयाः श्रीरागस्य वराङ्गनाः ॥ १८८ ॥

मल्लारी देशकारी च भूपाली गुर्जरी तथा ।
टक्कश्च पञ्चमीभार्या मेघरागस्य योषितः ॥ १८९ ॥

इति हनुमन्मते रागरागिण्यः ।

(183-189) Classification according to Hanuman :- 6 masculine Ragas, each having 5 consorts or Raginis.

(சு. 183-189) ஹனுமத் பரதம் என்னும் நூலில் சொல்லப்பட்டிருக்கும் பிரிவினை :-

6 புருஷ ராகங்களும் ஒவ்வொன்றுக்கும் 5 ஸ்திரீகளாகிய ராகிணிகளும்.

अथ रागार्णव मतम् ।

भैरवः पञ्चमो नाटो मल्लारो गौड मालवः ।
देशाख्यश्चेति षड्रागाः प्रोच्यन्ते लोकविश्रुताः ॥ १९० ॥

वङ्गालीयं गुणकरी मध्यमादिर्वसन्तकः ।
धनाश्रीश्चेति पञ्चैते रागा भैरवसंश्रयाः ॥ १९१ ॥

ललितागुर्जरीदेशी वराटी रामकृत्तथा ।
मता रागार्णवे रागाः पञ्चैते नाटसंश्रयाः ॥ १९२ ॥

नटनारायणः पूर्वं गान्धारः सालगस्तथा ।
ततः केदारकर्णाटौ पञ्चैते नाटसंश्रयाः ॥ १९३ ॥

मेघमल्लारिका मालकौशिकः पढमञ्जरी ।
असावेरींति विज्ञेयाः रागा मल्लारिसंश्रयाः ॥ १९४ ॥

हिन्दोलस्त्रिवणांधारी गौडी च पडहंसिका ।
पञ्चैते रागनामानं गौडमाश्रित्य संस्थिताः ॥ १९५ ॥

भूपाली च कुडायी च कांभोदी नाटिका तथा ।
वेलावलीति विज्ञेया रागादेशाख्यसंश्रया ।

इति रागार्णवमतम् ।

न तालानां न रागाणां अन्तः कुत्रापि विद्यते ॥ १९६ ॥

(190-196) Classification according to Ragarnava :- 6 principal ragas, and 5 subordinate ragas attached to each of the principal ones.

(சு, 190-196) ராகார்ணவ மதப்படி ராகங்களின் பிரிவினை :- 6 முக்ய ராகங்களும் ஒவ்வொரு முக்கிய ராகத்துக்கும் சார்பு ராகங்கள் 5ம்.

इदानीं राग रागिण्युदाहरणं प्रारम्यते ॥

धैवतांश ग्रहन्यासो रिपहीनोथ मागतः :
भैरवस्स तु विज्ञेयः धैवतादिक मूर्छनः ।
धैवतो विक्रतोयत्र औडवः परिकीर्तितः ॥ १९७ ॥

उदाहरणम् ।

गङ्गाधरः शशिकलातिलकस्त्रिनेत्रः
सर्पैर्विभूषिततनुर्गजकृत्तिवासाः ।
भास्वत्त्रिशूलकर एप नृमुण्डधारी
शुभ्राम्वरोजयति भैरव आदिरागः ॥ १९८ ॥

धनि सगमधनि । इति भैरव: ॥ १ ॥

(197-198) **Bhairava raga lakshana.**

(சு. 197-198) 'பைரவ' ராக லக்ஷணம்.

मध्यमाविश्वरागांगा ग्रहांशन्यास मध्यमा ।
सप्तस्वरैस्तु गातव्या मध्यमादिक मूर्छना ।
सम्पूर्णा कथिता तद्ज्ञैः रि ध हीना क्वचिन्मता ॥ १९९ ॥

उदाहरणम् ।

पत्या सहासं परिरभ्य कामं संचुम्बितास्या कमलायताक्षी ।
स्वर्णच्छविः कुङ्कमलिप्तदेहा सामध्यमादिः कथिता मुनीन्द्रैः ॥

पधमनी सरिगमा अथवा मम पम पनि सनिगम, ।

इति मध्यमादिः ॥ २ ॥

(199-200) Raga Madhyamadi lakshana.

(சு. 199-200) 'மத்யமாதி' ராகலக்ஷணம்.

सम्पूर्णा भैरवी ज्ञेया ग्रहांशन्यास मध्यमा ।
सौवीरीमूर्छना ज्ञेया मध्यमग्रामचारिणी ।
केचिदेनां भैरववत् स्वरैर्ज्ञेया विचक्षणैः ॥ २०१ ॥

उदाहरणम् ।

स्फटिकरचितपीठे रम्यकैलासशृङ्गे
विकचकमलपत्रैरर्चयन्तीमहेशम् ।
करधृतघनवाद्या पीतवर्णायताक्षी
सुकविभिरियमुक्ता भैरवी भैरवस्त्री ॥ २०२ ॥

मपधनि सरि गम अथवा धनि सगम धम ।। इति भैरवी ।। ३ ।।

(201-202) 'Bhairavi' lakshana.

(சு. 201-202) 'பைரவி' லக்ஷணம்.

वङ्गाली औडवाज्ञेया ग्रहांशन्यासषड्जभाक् ।
रि ध हीना च विज्ञेया मूर्छना प्रथमा मता ।
पूर्णा वा मतयोपेता कल्लिनाथेन भाषिता ।। २०३ ।।

उदाहरणम् ।

कक्षे निवेशितकरंण्डधरस्तपस्वी
भास्वत्त्रिशूल परिमण्डितवामहस्तः ।
भस्मोज्ज्वलो निबिडबद्धजटाकलापः
वङ्गाल इत्यभिहितस्तरुणार्कवर्णः ।। २०४ ।।

सगम पनि स अथवा मपधनि सरि गम । इति वङ्गाली ।। ४ ।।

(203-204) 'Bangali' lakshana.

(சு. 203-204) 'பங்காளி' லக்ஷணம்.

षड्जग्रहांशकन्यासा वराटी कथिता बुधैः ।
प्रथमा मूर्छना यस्यां सम्पूर्णा कीर्तिवर्धनी ।। २०५ ।।

उदाहरणम् ।

विनोदयन्ती दयितं सुकेशी सुकङ्कणा चामरचालनेन ।
कर्णे दधाना सुरवृक्षपुष्पं वराङ्गनेयं कथिता वराटी ।। २०६ ।।

सरिगम पधनिस । इति वराटी ।। ५ ।।

(205-206) 'Varati' lakshana.

(205-206) 'வராடி' (வராளி) லக்ஷணம்.

षड्जग्रहांशकन्यासा सम्पूर्णा सैन्धवी मता ।
मूर्छनोत्तरमन्द्राद्या कैश्चित् षाडविका मता ।
रि हीना तु भवेन्नित्यं रसे वीरे प्रयुज्यते ॥ २०७ ॥

उदाहरणम् ।

त्रिशूलपाणिः शिवभक्तियुक्ता रक्ताम्बरा धारितबंधुजीवा ।
वीरे रसे गायकगीतवर्णा सा सैन्धवी भैरवरागिणीयम् ॥ २०८
सरिगम पधनिस अथवा सगमपधनिस । इति सैन्धवी ॥ ६ ॥

इति पंचभार्यासहितोभैरवः ।

(207-208) 'Saindhavi' lakshana.

(சு. 207-208) 'ஸைந்தவி' லக்ஷணம்.

षड्जग्रहांशकन्यासः सम्पूर्णः कौशिको मतः ।
मूर्छना प्रथमा ज्ञेया काकलीस्वरसम्मतः ॥ २०९ ॥

उदाहरणम् ।

आरक्तवर्णो धृतगौरयष्टिः वीरः सुवीरेषु कृतप्रवीरः ।
वीरैर्वृतो वैरिकपोलमालामाली मतो मालवकौशिकोयम् ॥
सरिगमपधनिस सनिधपमगरिस ।

इति मालव कौशिकः ॥ ७ ॥

(209-210) 'Malava Kausika' lakshana.

(சு. 209-210) 'மாளவ கௌசிக' லக்ஷணம்.

मध्यमांश ग्रहन्यासा सौवीरी मूर्छना मता ।
सम्पूर्णा कथिता तज्ज्ञैः टोडी स्त्री कौशिके मता ।
ग्रहांशन्यासषड्जश्च केचिदत्र प्रचक्षते ॥ २११ ॥

उदाहरणम् ।

तुषार कुन्दोज्ज्वल देहयष्टिः काश्मीर कर्पूर विलिप्तदेहा ।
विनोदयन्ती हरिणं वनान्ते वीणाधरा राजति टोडिकेयम् ॥
मपधनि सरिगम अथवा सरिगम पधनिस । इति टोडी ॥ ८ ॥

(311-212) 'Todi' lakshana.

(சு. 211-212) 'டோடி' (தோடி) லக்ஷணம்.

धैवतांश ग्रहन्यासा षाडवा त्यक्तपञ्चमा ।
खंभावती च विज्ञेया मूर्छना पौरवी मता ॥ २१३ ॥

उदाहरणम् ।

खंभावतिः स्यात् सुखदा रसज्ञा सौन्दर्यलावण्य विभूषिताङ्गी ।
दानप्रिया कोकिल तुल्यनादा प्रियंवदा कौशिकरागिणीयम् ॥
धनि सरि गमध । इति खंभावती ॥ ९ ॥

(213-214) 'Khambhavati lakshana.

(சு. 213-214) 'கம்பாவதி' லக்ஷணம்.

ग्रहांशन्यासषड्जास्या द्रिपवर्जा सुखप्रदा ।
मूर्छना प्रथमा ज्ञेया गौरी सर्वाङ्गसुन्दरी ॥ २१५ ॥

उदाहरणम् ।

निवेशयन्ती श्रवणंवतंसमाम्राङ्कुरं कोकिलनादरम्या ।
श्यामा मधुस्यन्दितसूक्ष्मनादा गौरीयमुक्त किल कोहलेन ॥२१६
सगमधनिस सनिधमगम । इति गौरी ॥ १० ॥

(215-216) 'Gouri' lakshana.

(சு. 215-216) 'கௌரி' லக்ஷணம்.

रिधहीना गुणकरी चौडवा परिकीर्तिता ।
निग्रहांशा तु विन्यासा कैश्चित् षड्ज त्रयामता ।।
रजनी मूर्छना चात्र मालवाश्रयणी तु सा ।। २१७ ।।

उदाहरणम् ।

शोकाभिभूननयनारुणदीनदृष्ठिः
नम्राननना धरणिधूसरगात्रयष्टिः ।
आमुक्तचारुकवरी प्रियदूरवर्ती
संकीर्तिता गुणकरी करुणे कृशाङ्गी ।। २१८ ।।

निसगमपनि निपमगसनि अथवा सगमपनिस । इति गुणकरी ।। ११ ।।

(217-218) 'Gunakari' lakshana.

(சு. 217-218) 'குணகரி' லக்ஷணம்.

धैवतांशग्रहन्यासा सम्पूर्णा ककुभामता ।
तृतीयमूर्छनोत्पन्ना शृङ्गाररसमण्डिता ।। २१९ ।।

उदाहरणम् ।

सुपोषिताङ्गी रतिमण्डिताङ्गी चन्द्रानना चम्पकदामयुक्ता ।
कटाक्षिणी स्यात् परमा विचित्रानादेन युक्ता ककुभा मनोज्ञा ।।
धनिलरिगमपध इति ककुभा ।। इति पञ्चभार्यासहितो
मालव कौशिकः ।। १२ ।।

(219-220) 'Kakuba' lakshana.

(219-220) 'ககுபா' லக்ஷணம்.

हिन्दोलको रि ध स्यक्तः सत्रयः कथितो बुधैः ।
मूर्छना शुद्धमध्या स्यात् औडवः काकलीयुतः ।। २२१ ।।

उदाहरणम् ।

नितम्बिनीमन्दतरङ्गितासु दोलासु खेलासुखमादधानः ।
खर्वःकपोतद्युतिकामयुक्तो हिन्दोलारागः कथितोमुनीन्द्रैः ॥
सगम पाने मपस । इति हिन्दोलः ॥ १३ ॥

(221-222) 'Hindola' lakshana.
(சு. 221-222) 'ஹிந்தோள' லக்ஷணம்.

धैवतांशग्रहन्यासा पूर्णा वेलावली मता ।
पौरवीमूर्छनाज्ञेया रसेवीरे प्रयुज्यते ॥ २२३ ॥

उदाहरणम् ।

सङ्केतदीक्षां दयिते च दत्वा वितन्वती भूषणमङ्गकेषु ।
मुहुः स्मरन्ती स्मरमिष्टदेवं वेलावली नीलसरोजकान्तिः ॥२२४
धनि सरि गम पध । इति वेलावली ॥ १४ ॥

(223-224) 'Velavali' lakshana.
(சு. 223-224) 'வேளாவளி' லக்ஷணம்.

षड्जग्रहांशकन्या सा पूर्णा रामकरी मता ।
मूर्छना प्रथमा ज्ञेया करुणे सा प्रयुज्यते ॥ २२५ ॥

रि ध त्यक्ता तु केचित्तु केचित्पञ्चमवर्जिता ।
षाडवा औडवा ज्ञेया सम्पूर्णा च त्रिधा मता ॥ २२६ ॥

उदाहरणम् ।

हेमप्रभाभासुरभूषणा च नीलं निचोलं वपुषा वहन्ती ।
कान्ते समीपे कमनीयकण्ठा मानोन्नता रामकरी मतेयम् ॥२२७
सगमपनिस अथवा सरिगमपधनिस अथवा सरिगमपधनि स ।
इति रामकरी ॥

(225-227) 'Ramakari' lakshana.

(சு. 225-227) 'ராமகரி' லக்ஷணம்.

दशाख्या षाडवा ज्ञेया गत्रयेण विभूषिता ।
ऋषभेण वियुक्ता सा शार्ङ्गदेवेन कीर्तिता ।
मूर्छनाहरिणाश्वा च सम्पूर्णां केचिदूचिरे ॥ २२८ ॥

उदाहरणम् –

वीरे रसे व्यंजितरोमहर्षा
निरुध्य सम्बन्धविलासबाहुः ।
प्रांशुः प्रचण्डा किल सुंदराङ्गी
देशाख्यारागः कथितो मुनीन्द्रैः ॥ २२९ ॥

[हिन्दोलकान्ताकिल देशकारः । इति वा पाठः]

गमपधनिसग अथवा गमपधनिसरिग इति देशाख्या ॥ १६ ॥

(228–229) 'Desakhya' lakshana,

(சு. 228–229) 'தேசாக்யா' (தேசாக்ஷி) லக்ஷணம்,

पञ्चमांश ग्रहन्यासा पूर्णा स्यात्पटमञ्जरी ।
हृष्यका मूर्छना ज्ञेया रसिकानां सुखप्रदा ॥ २३० ॥

उदाहरणम् –

वियोगिनी कान्तविशीर्णनेत्रा स्रजं वहन्तीं वपुषा च शुक्लाम् ।
आश्वास्यमाना प्रियया च सख्या सुधूसराङ्गी पटमञ्जरीयम् ॥

(230-231) 'Patamanjari' lakshana.

प ध निस रीगमप । इति पटमञ्जरी ॥ १७ ॥

(சு. 230–231) படமஞ்சரி லக்ஷணம்.

रि प वर्जा च ललिता औडवा स त्रया मता ।
मूर्छनाशुद्धमध्यो स्यात् संपूर्णा केचिदूचिरे ॥
धैवतत्रयसंयुक्ता द्वितीयललिता मता ॥ २३२ ॥

उदाहरणम् –

प्रफुल्लसप्तच्छदमाल्ययुक्ता गौरी कृशाङ्गी तरुणी चलाक्षी ।
विनिश्वसत्वासवशात् प्रभाते विलासवेशा ललितोप्रदिष्टा ॥ २३३ ॥

स ग म ध नि स अथवा धनि स ग म ध इति ललिता ॥ १८ ॥

इति पञ्चम भार्यासहितो हिन्दोलः ॥

(232–233) 'Lalita' lakshana.

(சு. 232–233) லலிதா லக்ஷணம்.

षड्जग्रहांशकन्यासः सम्पूर्णो दीपको मतः ।
मूर्छना शुद्धमध्यास्यात् गातव्या गायनै सदा ॥ १३४ ॥

उदाहरणम् –

बाला रतार्थं प्रविलीनदीपे गृहेन्धकारे सुभगी प्रवृत्ता ।
तस्याः शिरोभूषणरत्नदोपैः लज्जां तदानीं कृतवान् प्रदीपः ॥२३५॥

स रि ग म प ध नि स । इति दीपकः ॥ १९ ॥

(234–235) 'Dipaka' lakshana.

(சு. 234–235) 'தீபக' லக்ஷணம்.

केदारी रिधहीनास्यात् औडवा परिकीर्त्तिता ।
नित्रया मूर्छनामार्गी काकलीस्वरसम्मिना ॥ २३६ ॥

उदाहरणम् -

जटांदधानः सितचन्द्रमौलिः नागोत्तरीयो धृतयोगपीठः ।
गङ्गाधरो ध्याननिमग्नचित्तः केदाररागः कथितस्तपस्वी ॥२३७॥

[विरहविबुधचित्ता पाण्डुगण्डा कृशाङ्गी
मलयजरसपूरैः सिच्यमाना सखीभिः ।
सरसकमलपत्रैः क्लृप्तशय्यानिविष्टा
हिमकरसितवस्त्रा भाति केदारिकेयम् ॥ २३८ ॥]

नि स ग म प नि नि प म ग स नि । इति केदारी ॥ २० ॥

(236–238) 'Kedari' lakshana.

(சு. 236–238) 'கேதாரீ' லக்ஷணம்.

त्रिनिषादोथ संपूर्णा निषादो विकृतो भवेत् ।
मार्गीयं मूर्छना ज्ञेया कर्णाटीयं सुखप्रदा ॥ २३९ ॥

उदाहरणम् –

कर्णाटी कमलेक्षणा सुरतरोर्मूले वसन्ती मुहुः
श्वासोच्छ्वासविभिन्नमोदमभितः सम्पूरयन्ती दिशः ।
कीरं नीलनिचोलजुष्टमभितः स्वर्णाभया बिभ्रती
कान्तारे पिककूजिते स्वदयितं साङ्केतिके पश्यति ॥

नि स रि ग म प ध नि । इति कर्णाटी ॥ २१ ॥

(233–240) 'Karnati' lakshana.

(சு. 237–240) 'கர்ணாட' லக்ஷணம்.

देशी पञ्चम हीना स्यात् ऋषभत्रयसंयुता ।
कलोपनतिका ज्ञेया मूर्छना विकृतर्षभा ॥ २४१ ॥

उदाहरणम् –

निद्रालसं सा कपटेन कान्तं विबोधयन्ती सुरतोत्सुकेन ।
गौरी मनोज्ञा शुकपूच्छवस्त्रा ख्याता च देशी रसपूर्ण
चित्ता ॥ २४२ ॥

रि ग म ध नि स रि इति देशी ॥ २२ ॥

(240-242) 'Desi' lakshana.

(சு. 240—242) 'தேசி' லக்ஷணம்.

ध्वांशन्यासग्रहा पूर्णा पौरवी मूर्छना मता ।
मल्लारनिकटे गेया कामोदी च निगद्यते ॥
शिवभूषणकेदारयुक्ता सर्वसुखप्रदा ॥ २४३ ॥

उदाहरणम् –

पीतंवसाना वसनं सुकेशी वने रुदन्ती पिकनाददूना ।
विलोकयन्ती विदिशोऽतिभीता कामोदिकाळान्त-
मनुस्मरन्ती ॥

ध नि स रि ग म प ध । इत्ति कामोदी ॥ २३ ॥

(242—244) 'Kamodi' lakshana.

(சு. 242–244) 'காமோதி' லக்ஷணம்.

ग्रहांशन्यासषड्जा स्यात् सम्पूर्णा नाटिका मता ।
प्रथमा मूर्छना ज्ञेया गमकै र्बहुधा मता ॥ २४५ ॥

उदाहरणम् –

उद्यद्भानुसुहृच्छवि विकसितं पङ्केरुहं पाणिना
स्पृश्यन्ती मधुपानघूर्णनयना तन्वी तमालद्युतिः ।

ताम्बूलाहरणच्छलेन दयितं सङ्केतयन्ती निजं
क्रीडाकुञ्जगृहे लवङ्गलतिकामोदानिले कामिनी ।।२४६।।

जपाकुसुमसङ्काशां निचोलं पीतवाससम् ।
वहन्ती वपुषा तन्वी नाटिका रक्तकञ्चुकी ।। २४७ ।।

स रि ग म प ध नि स - स नि ध प म ग रि स ।
इति नाटिका ।। २४ ।।

इति पञ्चभार्यासहितो हिन्दोलः ॥

(244—246) 'Natika' lakshana.

(சு. 244—246) 'நாடிகா' லக்ஷணம்.

श्रीरागः स च विख्यातः स त्रयेण विभूषितः ।
पूर्णः सर्वगुणोपेतः मूर्छना प्रथमा मता ।।
केचित्तु कथयन्त्येनं ऋषभत्रयसम्मतम् ।। २४८ ।।

उदाहरणम् –

अष्टादशाब्दः स्मरचारुमूर्तिः धीरोल्ललसत्पल्लवकर्णपूरः ।
षड्जादिसेव्योऽरुणवस्त्रधारी श्रीरागराजः
क्षितिपालमूर्तिः ।। २४९ ।।

स रि ग म प ध नि स अथवा रि ग म प ध नि स इति श्रीरागः ।।२५।।

(247—249) 'Sriraga' lakshana.

(சு. 247—249) 'ஸ்ரீராக' லக்ஷணம்.

वसन्ता स्यात्तु संपूर्णा सत्रया कथिता बुधैः ।
श्रीरागमूर्छनैवात्र गेया रागविशारदैः ।। २५० ।।

उदाहरणम् –

शिखण्डिवर्होच्चयवद्धपीडा कर्णावतंसा स्फुरदाम्रपत्रा ।
इन्दीवरश्यामतनुर्मनोज्ञा वसन्तिका स्यादलिमञ्जुलश्रीः ।।

स रि ग म प ध नि स इति वसन्तिका ! ।। २६ ।।

(249—251) 'Vasantika' lakshana.

(249—251) 'வஸந்திகா' (வஸந்த) லக்ஷணம்.

मालवी चौडवा ज्ञेया नि तथा प, रि, वर्जिता ।
रजनी मूर्छना ज्ञेया काकलीस्वरमण्डिता ।। २५२ ।।

उदाहरणम् –

नितम्बिनी चुम्बितवक्त्रपद्मः शुकद्युतिः कुण्डलवान्प्रमत्तः ।
सङ्गीतशालां प्रविशन्प्रदोषे मालाधरो मालव एव रागः ।।

नि स प म ग नि । इति माळवी ।
[निसरिमगनि इति वा पाठः] ।। २७ ।।

(252-253) 'Malavi' lakshana.

(சு. 252–253) 'மாளவஸ்ரீ' லக்ஷணம்.

मालवश्रीश्चरक्ताङ्गी पूर्णा सत्रयभूपिता ।
मूर्छनोत्तरमन्द्रा स्यात् शृङ्गाररसमण्डिता ।। २५४ ।।

उदाहरणम् -

रक्तोत्पलं हस्ततले नियुक्तं विभावयन्ती तमुदेहवल्ली ।
रसालवृक्षस्यतले निपण्णा स्तोकामता साकिल मालवश्रीः ।।

स रि ग म प ध नि स । इति माळवश्रीः ।। २८ ।।

(254-255) 'Malavasri' lakshana.

(254—255) 'மாளவஸ்ரீ' லக்ஷணம்.

सत्वया हीनऋषभा षाडवा च धनासिरी ।
मूर्छना प्रथमा ज्ञेया रसे वीरे प्रयुज्यते ॥ २५६ ॥

उदाहरणम् -

दूर्वादलश्यामतनुर्मनोज्ञा कान्तं लिखन्ती विरहेण दूना ।
श्वेते कपोले नयनारविन्दानिष्यन्दनिर्धूतकुचा धनाश्रीः ॥

सगमपधनिस । इति धनाश्रीः ॥ २९ ॥

(256—257) 'Dhanasri' lakshana.

(அ. 256—257) 'தனாச்ரீ' லக்ஷணம்.

असावरी गरी त्यक्ता पग्रहां शांत(?) औडवा ।
न्यासस्तु धैवतोज्ञेयः करुणारसनिर्भरा ॥ २५८ ॥

अथवा ।

ककुभाद्धैवतोत्पन्ना धैवतांशग्रहामता ।
पञ्चमेनैव रहिता षाडवा च निगद्यते ॥ २५९ ॥

उदाहरणम् —

श्रीखण्डशैलशिखरे शिखपुच्छवस्त्रा
मातङ्गमौक्तिककृतोत्तमहाखल्ली ।
आकृष्य चन्दन तरोरुरगं वहन्ती
सासावरीति कथितोज्वल नीलकान्तिः ॥ २६० ॥

ध नि स म प ध ।

अथवा मधनिसरिगधगरिसनिध । इति सावेरी ॥ ३० ॥

(257–259) 'Asaveri' (Saveri) lakshana.

(சு. 257–259) 'அஸாவரி' (ஸாவேரி) லக்ஷணம்.

इति पञ्चभार्यासहितः श्रीरागः ॥

मेघः पूर्णो धत्रयःस्यात् उत्तरायतमूर्छनः ।
विकृतो धैवतो गेयः शृङ्गाररसपूरकः ॥ २६१ ॥

उदाहरणम् —

नीलोत्पलाभवपुरिन्दुसमानचैलः पीताम्बरस्तृषितचातकयाच्यमानः
पीयूषमन्दहसितोद्यममन्यवर्ती वीरेषु राजति युवा किल मेघरागः

ध नि स रि ग म प ध इति मेघरागः ॥ ३१ ॥

(260-261) 'Megharaga' lakshana.

(சு. 260–261) 'மேகராக' லக்ஷணம்.

मल्लारी स प हीनास्यात् ग्रहांशन्यासधैवता ।
औडवा पौरवी ज्ञेया वर्षासु सुखदा सदा ॥ २६२ ॥

गौरी कृशा कोकिलकण्ठनादा गीतछलेनात्मपतिं स्मरन्ती ।
आदाय वीणां मलिना रुदन्ती मल्लारिका यौवन
दूनचित्ता ॥ २६३ ॥

ध नि रि ग म ध इति मल्लारिका ॥ ३२ ॥

---

1. 'Asavari' and 'Saveri' are both indifferently used for the raga in older texts also.

(262-263) 'Mallari' lakshana.

(சு. 262-263) 'மல்லாரி' லக்ஷணம்.

देशकारी तु सम्पूर्णा षड्जन्यास ग्रहांशका ।
मूर्छना प्रथमा ज्ञेया वराटीमिश्रिताभवेत् ॥ २६४ ॥

उदाहरणम् -
भर्त्रासमं केलिरसं सुकेशी सर्वाङ्गपूर्णा कमलायताक्षी ।
पीनस्तनी रुक्मतनुः सुवेशा संपूर्णचन्द्रानन देशकारी ॥

स रि ग म प ध नि स इति देशकारी ॥ ३३ ॥

(263-64) 'Deshakari' lakshana.

(சு. 263-264) 'தேசகாரி' லக்ஷணம்.

षड्जग्रहांशकन्यासा भूपाली कथिता बुधैः ।
मूर्छना प्रथमा यत्र सम्पूर्णा शान्तिके रसे ।
कैचित्तुरीयहीनेय औडवा परिकीर्तिना ॥ २६३ ॥

उदाहरणम् -

गौरद्युतिः कुङ्कुमलिप्तदेहा तुङ्गस्तनी चन्द्रमुखा मनोज्ञा ।
भर्तुः स्मरन्ती विरहेण दूना भूपालिकेयं रसशान्तियुक्ता ॥

स रि ग म प ध नि स इति भूपाली ॥ ३४ ॥

(266-267) 'Bhupali' lakshana.

(சு. 266-267) 'பூபாளி' லக்ஷணம்.

ग्रहांशन्यास ऋषभा सम्पूर्णा गुर्जरी मता ।
सप्तमी मूर्छना तस्यां बहुन्यास विमिश्रिता ॥ २६७ ॥

उदाहरणम् -

श्यामा सुकेशी मलयद्रुमाणां मृदूल्लसत्पल्व तल्पमध्ये ।
श्रुतिस्वराणां दधतीविभागं तन्त्रीमुखा दक्षिणगुर्जरीयम् ॥

रि ग म प ध नि स रि इति गुर्जरी ॥ ३५ ॥

(268-269) 'Gurjari' lakshana.

(268–269) 'குர்ஜ்ஜரி' லக்ஷணம்.

टक्कःस्यात्तु त्रिधाषड्जः सम्पूर्णश्चादि मूर्छनः ।

उदाहरणम् -

शय्यासु सुप्तां नलिनीदळानां वियोगिनीं वीक्ष्य विषण्णचित्ता ।
सुवर्णवर्णग्रहमागतःसन् सम्भाषतेतां किल टक्क संज्ञः ॥

स रि ग म प ध नि स इति टक्कः । इति पञ्चभार्यासहितो
मेघरागः ॥ ३६ ॥

(270) 'Takka Raga' lakshana.

(270, 'டக்க ராக' லக்ஷணம்.

कल्याणनाटो विज्ञेयः सम्पूर्णो रि त्रयोमतः ।
षड्जत्रयोपि कैश्चित्तु सम्प्रदिष्टो मनीषिभिः ॥ २७१ ॥

उदाहरणम् -

कृपाणपाणिस्तिलकं ललाटे सुवेषवेपः समरे प्रचण्डः ।
स्मरन्प्रविष्टः किल रक्तवर्णः कल्याणनाटः कथितोमुनीन्द्रैः ॥

रि ग म प ध नि स रि अथवा स रि ग म प ध नि स,
इति कल्याणनाटः ॥ ३७ ॥

(271-272) 'Kalyana nata' lakshana.

(சு. 271-272) 'கல்யாணநாட்ட' லக்ஷணம்.

सारङ्गनाटः सम्पूर्णः सत्रयोत्तरमन्द्रजः ।

उदाहरणम् -

वीणांदधाना दृढवद्धवेणी
सख्यासभं मञ्जुलवृक्षमूले ।
जाम्बूनदाभा च निषण्णदेहा
सारङ्गनाटा कथिता सुवेषैः ॥ २७३ ॥

अथवा

करधृतवीणा सख्यासहोपविष्टा च कल्पतरुमूले ।
दृढनरनिवन्द्धकवरी सारङ्गा सा सुरङ्गिणी प्रोक्ता ॥२७४॥

स रि ग म प ध नि स इति सारङ्गनाटः ॥ ३८ ॥

(273-274) 'Saranganata' lakshana.

(சு. 273-274) 'சாரங்கநாட்ட' (சாலங்கநாட்ட லக்ஷணம்.

देवगिर्याः स्वराः प्रोक्ताः सारङ्गसदृशा मताः ।

उदाहरणम् -

नितम्बिनी श्यामतनुः प्रवृत्ततुङ्गस्तनी सुन्दरहारवल्ली ।
चित्रांवरा मत्तचकोरनेत्रा मदालसा देवगिरि मतेयम् ॥२८५॥

स रि ग म प ध नि स इति देवगिरी ॥ ३९ ॥

(275) 'Devagiri' lakshana.

(சு. 275) 'தேவகிரி' லக்ஷணம்.

सोरटी षाड्वा ज्ञेया पञ्चमत्नयसम्मता ।
रि हीना च समाख्याता कैश्चित्षड्जत्नयामता ॥ २७६ ॥

उदाहरणम् -

पीनोन्नतस्तनतटोत्तमहारवल्ली
कर्णोत्पलभ्रमरनादविलग्नचिता ।
याति प्रियान्तिक मतिश्लथबाहुवल्ली
सौराष्ट्रिका मदनमूर्तिविचारगौरा ॥ २७७ ॥

प ध नि स ग म प अथवा स ग म प ध नि स इति सोरटी ॥४०॥

(276-277) 'Sorati' lakshana.

(சு. 276-276) 'ஸோரடீ' (சுருட்டி) லக்ஷணம்.

त्रिवणा सा च विज्ञेया ग्रहांशन्यासधैवता ।
औडवा सा समाख्याता परिहीना प्रकीर्तिता ॥ २७८ ॥

उदाहरणम् -

रम्भायाः सुतरोर्मूले निषण्णा पीतवर्णभाक् ।
तन्वङ्गी हारसंयुक्ता प्रियेण त्रिवणा मता ॥ २७९ ॥
ध नि स ग म ध । इति त्रिवणा ॥ ४१ ॥

(278-279) 'Trivana' lakshana.

(சு. 278-279) 'த்ரிவணா' லக்ஷணம்.

षड्जत्नया पहाडी स्यात् रि प हीना च गौरिवत् ।
छाया तैलङ्गदेशीया आलापे चौडया मता ॥ २८० ॥

उदाहरणम् -

वीणोपगायत्यतिसुन्दराङ्गी
रक्ताम्बरा मञ्जुकदम्बमूले ।
श्रीचन्दनाद्रौ स्थितिकारिणी सा
श्रीरागकान्ता कथिता पहाडी ॥ २८१ ॥

इति पहाडी ॥ ४२ ॥

(280-281) 'Pahadi' lakshana.

(சு. 280-281) 'பஹாடீ' லக்ஷணம்.

रागः पञ्चमको ज्ञेयः प हीनः षाडवो मतः ।
प्रथमा मूर्छना यत्र षड्जत्रयविभूषितः ।
केचिद्वदन्ति सम्पूर्णः शृङ्गाररसपूरकः ॥ २८२ ॥

उदाहरणम् -

रक्ताम्बरो रक्तविशालनेत्रः शृङ्गारयुक्तस्तरुणो मनस्वी ।
प्रभातकाले विजयी च रत्यां सदा प्रियः कोकिलमञ्जुभाषी ॥

स रि ग म ध नि स - अथवा - स रि ग म प ध नि स

इति पञ्चमरागः ॥ ४३ ॥

(282-283) 'Panchamaraga' lakshana.

(சு. 282-283) 'பஞ்சம ராக' லக்ஷணம்.

वेलावल्याः स्वरैर्युक्तः शङ्कराभरणो मतः ॥ २८४ ॥

इति शङ्कराभरणम् ॥ ४४ ॥

(284) 'Sankarabharana' lakshana.

(சு. 284) 'சங்கராபரண' லக்ஷணம்.

वडहंसे स्वरा ज्ञेयाः कर्णाटे कथिता बुधैः ॥ २८५ ॥

इति वडहंसः ॥ ४५ ॥

(285) 'Badahamsa' lakshana.

(சு. 285) 'படஹம்ஸ' (பலஹம்ஸ) லக்ஷணம்.

ललितावद्विभासस्तु रेवा गुर्जुरिवत्सदा ॥ २८६ ॥

इति विभासः । इति रेवा ॥ ४६ ॥

(286) 'Reva' raga lakshana.

(சு. 286) 'ரேவா' லக்ஷணம்.

देशाख्यसदृशा गेया कुडाई सर्वसम्मता ॥ २८७ ॥

इति कुडाई ॥ ४७ ॥

(287) 'Kudayee' lakshana.

(சு. 287) 'குடாயி' லக்ஷணம்.

कल्याणसदृशी गेया आभीरी सर्वसम्मता ॥ २८८ ॥

इति आभीरी ॥ ४८ ॥

(288) 'Abhiri' lakshana.

(சு. 288) 'ஆபீரீ' லக்ஷணம்.

मालश्री जयतश्रीश्च धानाश्री मारुका तथा ।
एषां श्रुतिस्वरग्रामजात्यादिनियमो न हि ।
नानादेशगतच्छाया देशी रागास्तु ते स्मृताः ॥ २८९ ॥

(269) 'Malasri' 'Jayatasri' 'Dhanasri' 'Maruka' and other Desi Ragas do not obey the laws of Sruti, Swara, Grama and Jati.

(சு. 289) 'மாளஶ்ரீ', 'ஜயதஶ்ரீ', 'தனஶ்ரீ', 'மாருகா' முதலிய தேசி ராகங்களுக்கு ச்ருதி, ஸ்வர, க்ராம, ஜாதி போன்ற நியமம் இல்லை.

इति श्रीलक्ष्मीश्वर सुत चतुरदामोतर विरचिते सङ्गीतदर्पणे 'रागाध्यायः' ॥

'अथ प्रकीर्णकाध्यायः ।

अथ गीतोपयोगित्वादालप्तिर्गमकादयः ।
निरूप्यन्ते मया सम्यक् लक्ष्यदृष्टया तु तत्वतः ॥ २९० ॥

रागालापनमालप्तिः प्रकटीकरणं मतम् ।
सा पुनर्द्विविधा रागरूपकाभ्यां विशेषणात् ॥ २९१ ॥

(290-291) 'Alapana or Alapti' or exposition of the 'Raga' or mode defind; and its 2 kinds, namely,

(1) Ragalapti, the expansion of Raga without a composition

(2) Rupakalapati, that is expansion of portions of a musical piece.

(சு. 290–291) 'ஆலாபம் அல்லது ஆலப்தி' என்றும் ராக விஸ்தாரம் — அதன் இருவகை :– (1) ராக ஆலப்தி (2) ரூபக ஆலப்தி.

स्वस्थानकैश्चतुर्भिर्या क्रियतेरूपकं विना ।
सा रागालप्तिरुदिता रूपकक्षेपणोत्तरा ॥ २९२ ॥

रागोपवेशनं यत्र स स्थायीस्वर ऊच्यते ।
यश्चतुर्थस्वरस्तस्मात् स च द्व्यर्ध उदीरितः ॥ २९३ ॥

तस्मादधस्तने यत्तु चालनं क्रियते स्वरे ।
मुखचालस्सकथितः स्वस्थानं प्रथमं च तत् ॥ २९४ ॥

द्व्यर्धस्वरे चालयित्वा विन्यसेत्तद् द्वितीयकम् ।
स्थायिस्वरादष्टमस्तु द्विगुणः परिकीर्तितः ॥ २९५ ॥

द्व्यर्धद्विगुणयोर्मध्ये स्थिता अर्धस्थिताःस्वराः ।
अर्धस्स्थिते चालयित्वा न्यसनं तु तृतीयकम् ॥ २९६ ॥

द्विगुणं चालयित्वा तु स्थायिन्यासश्चतुर्थकम् ।
एभिस्थानैश्चतुर्भिस्तु रागालप्तिर्विधीयते ॥ २९७ ॥

इदमेवोच्यते गानं अनिवद्धं पुरातनैः ।

(292–297) 'Method of Raga—Alapana; its stages or 'Swasthanas'.

(சு. 292–397) ராக ஆலாபனம் செய்யும் முறை; அதில் 4 படிகள் அல்லது 'ஸ்வஸ்தானங்கள்' (சொந்த வீடுகள்).

रूपकस्थेन रागेण तालेन च विधीयते ॥ २९८ ॥

रूपकालप्तिरेषा तु द्विविधा कथिता बुधैः ॥ २९९ ॥

प्रतिग्रहणिकाख्याद्या भञ्जनी संज्ञिकापरा ।
विधाय स्थायिमालप्ते रूपकावयवो यदि ॥ ३०० ॥

प्रतिगृह्येत सा प्रोक्ता प्रतिग्रहणिका बुधैः ।
भञ्जनी द्विविधा ज्ञेया स्थायीरूपक भञ्जनात् ॥ ३०१ ॥

यदा तत्पदमानेन स्थायीरूपकसंश्रयात् ।
नाना प्रकारः क्रियते सा ज्ञेया स्थायि भञ्जनी ॥ ३०२ ॥

तैः पदैस्तेन मानेन समग्रं रूपकं यदि ।
अन्यथा चान्यथा गायेदसौ रूपकभञ्जनी ॥ ३०३ ॥

इदमेवोच्यते लोके नेमशब्देन गायकैः ।

(298-303) Rupaka Alapti, its 2 kinds :-

(1) Pratigrahanika & (2) Bhanjani; the 2 forms of Bhanjani. (1) Consists in improvising music ending in the particular phrase in the piece; (2) Consists in changing the form of the phrase party or fully maintaining the chhaya or emotion.

(298-303) ரூபக ஆலப்தி — அதன் இருவகை —

(1) ப்ரதிக்ரஹணிகா (ஸ்வரம் பாடுதல்) (2) பஞ்சனி (சங்கதி போடுதலும், நிரவலும்)

वर्णालङ्कार सम्पन्ना गमकस्थायचित्रिका ॥ ३०४ ॥

आलप्तिः क्रियते तद्ज्ञैः बहुभङ्गिमनोहरा ।
स्वरस्य कम्पो गमकः श्रोतृचित्त सुखावहः ॥ ३०५ ॥

भेदाः पञ्चदशैवास्य कथितास्तिरिपादयः ।
लघिष्ठडमरुध्वान कम्पानुकृतिसुन्दरः ॥ ३०६ ॥

द्रुततुर्यांशवेगेन तिरिपः परिकीर्तितः ।
यदा द्रुततृतीयांश वेगःस्यात्स्फुरितस्तदा ॥ ३०७ ॥

द्रुतार्धमानवेगेन कम्पितं गमकं विदुः ।
द्रुतवेगेन लीनस्तु कम्पने गमको भवेत् ॥ ३०८ ॥

लघुवेगेन कम्पश्चेत् भवेदान्दोलितस्तदा ।
नाना प्रकारवक्रत्वं स्वरकम्पो यदा भवेत् ॥ ३०९ ॥

वेगाधिकस्तथा प्रोक्तो गमको वलिसंज्ञकः ।
त्रिभिन्नस्तु त्रिपुस्थानेष्वविश्रान्तघनस्वरः ॥ ३१० ॥

कण्ठे तु कोमलः कम्पः ग्रन्थिलोवलिलक्ष्मयुक् ।
कुरुलो नाम गमकः तदा प्रोक्तो मनीषिभिः ॥ ३११ ॥

स्वरमग्रिममाहत्य निवृत्तिस्त्वाहतो भवेत् ।
उल्लासितः स गमको यस्स्वरानुत्तरोत्तरान् ॥ ३१२ ॥

क्रमाद्गच्छन् भवेत्कम्पो वैचित्र्यात् हृदयङ्गमः ।
प्लावितो गमकः प्रोक्तःप्लुतमानेन कम्पनम् ॥ ३१३ ॥

हृदयङ्गमहुङ्कारे गम्भीरोगुंफितोभवेत् ।
मुखमुद्रणसम्भूतो मुद्रितोगमकोभवेत् ॥ ३१४ ॥

स्वराणां नमनाद्युक्तो गमको नामिताभिधः ।
एतेषामेव भेदानां यदास्यान्मिश्रणान्मिथः ॥ ३१५ ॥

मिश्रितस्स तदा प्रोक्तो गमकःस्याद्विचक्षणैः ।

(304-315) Gamaks or Graces; its 15 forms

(சு. 304-315) கமகங்கள் 15 வகை,

स्थाया अपि भवन्त्यत्र रागस्यावयवात्मना ॥ ३१६ ॥

(316-317) Sthayas or kinds of musical phrases well described in other text-books ; hance not dealt with herein.

(சு. 316-317) 'ஸ்தாயங்கள்' அல்லது பிடிகள். மற்ற நூல்களில் கண்டு கொள்க.

प्रसिद्धास्तद्वितां तेषु नोक्ता विस्तारभीतितः ।
रागाभिव्यक्तिशक्तित्वमनभ्यासेपि यद्ध्वनेः ॥ ३१७ ॥

तच्छारीरमितिप्रोक्तं शरीरेण सहोद्भवात् ।
तारस्थाने भवेद्यस्य माधुर्यं स्निग्धता तथा ॥ ३१८ ॥

गाम्भीर्यं मृदुता रक्तिः पुष्टिः कान्तिरनुध्वनिः ।
तत्सुशारीरमित्युक्तं लक्ष्यलक्षणकोविदैः ॥ ३१९ ॥

अनुध्यानविहीनत्वं रूक्षत्वं त्यक्तरक्तिता ।
निस्सारता विस्वरता काकित्वं स्थानविच्युतिः ॥ ३२० ॥

कार्श्यं कार्शश्यमित्येतत्कुशारीरन्तु दूषणैः ।
विद्यादानेन तपसा भक्त्या वा पार्वतीपतेः ।
प्रभूतभाग्यविभवैः सुशारीरमवाप्यते ॥ ३२१ ॥

(317-321) 'Sarira' or musical voice defined ; its good and fad features.

(சு. 317-321) 'சாரீரம்' என்றால் என்ன? அதன் குணங்களும், தோஷங்களும்.

एतत्प्रसङ्गतो लक्ष्म गायनादेरथोच्यते ।
लयतालकलाभिज्ञो ग्रामरागादिभेदवित् ।
गीतं गायति यो नाम रञ्जकस्स तु गायकः ॥ ३२२ ॥

सुशारीरो भवेद्यस्तु ग्रहमोक्षविचक्षणः ।
रागरागाङ्गभाषादि भेदज्ञस्तालवित्तमः ॥ ३२३ ॥

प्रबन्धगाननिपुणो विविधालापकोविदः ।
गमकेषु च सर्वेषु स्थानत्रयलसद्गतिः ॥ ३२४ ॥

आयत्तकण्ठवान् शुद्धच्छायालगविशेषवित् ।
जितश्रमस्सावधानः सर्वदोषविवर्जितः ॥ ३२५ ॥

सुसम्प्रदाय गीतज्ञैः कथ्यतेगायनोत्तमः ।
गुणैः कतिपयैर्हीनो निर्दोषो मध्यमोमतः ॥ ३२६ ॥

(322-326) 4 grades of singers : Gayaka, Gayakotthama, Gayaka madhyama, Gayakadhama.

(சு. 322-326) பாடகர்களின் 4 வகை: காயகர், காயகோத்தமர், காயமத்தியமர், காயகாதமர்.

कैश्चिद्गुणैरुपेतोपि सदोषो गायकाधमः ।
सन्दष्टोद्घुष्टभीतादि दोषाः स्युः पञ्चविंशतिः ॥ ३२७ ॥

सन्दश्य दशनं गायेत् असौ सन्दष्ट उच्यते ।
उद्घुष्टो विरसोद्घोषः सीत्कारी सीत्कृतैर्मुहुः ॥ ३२८ ॥

भयान्वितस्तु यो गायेत् स भीतो गायनो भवेत् ।
शङ्कितस्तु बुधैरुक्तः त्वरया यस्तु गायति ॥ ३२९ ॥

कम्पितः कम्पितो ज्ञेयः स्वभावाद्गात्रशब्दयोः ।
करालोद्घट्टितमुखः करालो गायनो भवेत् ॥ ३३० ॥

विकलस्स्तु यो गायेत् स्वरान्न्यूनाधिकस्मृतान् ।
काकक्रूरखः काकी वितालो तालविच्युतः ॥ ३३१ ॥

दधानः कन्धरं मूर्ध्नि करभोभिहितो बुधैः ।
छागवद्वहनीं कुर्वन् उद्भटोधमगायकः ॥ ३३२ ॥

शिरालफालवदनग्रीवामुखविकारवान् ।
झोंबकः कथितस्तज्ज्ञैर्गायनस्सर्वतोऽधमः ॥ ३३३ ॥

तुम्बकी तुम्बकाकारोत्फुल्लगल्लस्तु गायनः ।
वक्रीकृत्य तु योग्रीवां गायेद्वक्री स उच्यते ॥ ३३४ ॥

गात्रं प्रसार्य यो गायेत् प्रसारी स तु गायकः ।
नेत्रे निमील्य यो गायेत् स तु प्रोक्तो निमीलकः ॥ ३३५ ॥

नीरसो रक्तिहीनो यः स प्रोक्तो विरसोऽधमः ।
यस्तुवर्ज्यस्वरं गायेत् सोपस्वर उदाहृतः ॥ ३३६ ॥

अव्यक्तवर्णं यो गायेत् अव्यक्तस्सनिगद्यते ।
स्थानत्रयं नशक्नोति गातुं गानक्रियासु यः ॥ ३३७ ॥

स्थानभ्रष्टस्सकथितो गीतज्ञैर्गायनोधमः ।
शुद्धच्छायालगौ रागौ मिश्रयन्यस्तुगायति ॥ ३३८ ॥

समिश्रकस्तथान्येषां रागाणामपि मिश्रणात् ।
स्थाय्यादिष्ववधानेन निर्मुक्तोऽनवधानकः ॥ ३३९ ॥

(327-339) The 25 Outstanding faults in Singing.

(சு. 327-339) பாடுவதில் ஏற்படும் 25 தோஷங்கள்.

शिक्षाकारोनुकारश्च रसिको रञ्जकस्तथा ।
भावकश्चेति गीतज्ञाः पञ्चधा गायनं जगुः ॥ ३४० ॥

अन्यूनशिक्षणे दक्षः शिक्षाकारो मतस्सताम् ।
स्वबुध्यातिशयेनान्यच्छायामनुकरोति यः ॥ ३४१ ॥

अनुकारस्सकथितो द्वितीयोगायनो बुधैः ।
स्वयमेवरसाविष्टो रसिकोगायनोभवेत् ॥ ३४२ ॥

गानेन रञ्जयेद्यस्तु श्रोतॄन् गाता स रञ्जकः ।
गीतस्यातिशयोत्थानाद्भावकः परिकीर्तितः ॥ ३४३ ॥

(340-343) Four types of singers.

(சு. 340-343) நான்குவகைப் பாடகர்கள்.

एकल्यो यमलो वृन्दगायनश्चेति सत्रिधा ।
एक एव तु यो गायेत् असावेकल्यगायनः ॥ ३४४ ॥

स द्वितीयो यमलकः सवृन्दो वृन्दगायकः ।

344—Single double and group singers.

(சு. 344) ஒருவர், இருவர், பலர் சேர்ந்து பாடும் பாடகர்கள்.

रूपयौवन माधुर्यशालित्वमधिकोगुणः ॥ ३४५ ॥

345. The 3 necessary requirements of singers :—
1) attractive personality. 2) youthful stage in life.
3) sweet voice.

(சு. 345) பாடகர்களுக்கு முக்கியமான 3 குணங்கள் —
1) நல்ல தோற்றம், 2) வாலிப வயது, 3) இனிய குரல்.

वाग्वर्णसमुदायस्तु मातुरित्युच्यते बुधैः ।
गेयं धातुर्द्वयोः कर्ता प्रोक्तो वाग्गेय कारकः ॥ ३४६ ॥

346 The 2 Component parts of musical Composition.
1) 'Matu' (the words) 2) 'Dhathu' (the tune)

(சு. 346) ஸங்கீத ஸாஹித்தியத்தில் 2 அம்சங்கள் :-
1) 'மாது' (வார்த்தைகள்) 2) 'தாது' (வர்ணமெட்டு)

शब्दानुशासनज्ञान मभिधातप्रवीणता ।
छन्दःप्रभेदवेदित्वं अलङ्कारेषु कौशलम् ॥ ३४७ ॥

रसभावादिविज्ञानं सर्वदेशस्थितिज्ञता ।
लयतालकलाज्ञानं हृद्यशारीरशालिता ॥ ३४८ ॥

संङ्गीतशास्त्रनैपुण्यं प्रतिभा च सभाजयः ।
रागद्वेषपरित्यागः सान्द्रत्वमुचितज्ञता ॥ ३४९ ॥

प्रत्यग्रधातुनिर्माणमनुच्छिष्टार्थकल्पनम् ।
द्रुतगीतविनिर्माणं पाठान्तरविदग्धता ॥ ३५० ॥

इत्यादि गुणसंपन्नश्श्रेष्ठो वाग्गेयकारकः ।

(347-350) 'Vak - geya - kara' (the highly qualified Composer of music) and his qualifications.

(சு. 347-350) 'வாக்கேயகாரர்' எனும் உயர்ந்த கர்த்தாவின் லக்ஷணங்கள்.

धातोरतिशयं कुर्यात् मातुमन्दस्तु मध्यमः ॥ ३५१ ॥

अप्रगल्भः प्रबन्धेषु भवेत्सोपि च मध्यमः ।
अन्यधातौ मातुकर्ता कुट्टिकारोऽधमोमतः ॥ ३५२ ॥

(351-352) The lower ranks of comopsers.

(சு. 351-352) மத்தியம், அதம வாக்கேயகாரர்கள்.

इति श्रीमल्लक्ष्मीधरभट्टसुत चतुरदामोदर विरचिते संङ्गीतदर्पणे,
प्रकीर्णकाध्यायस्तृतीयस्समाप्तः ।

अथ प्रबन्धाध्यायश्चतुर्थः प्रारभ्यते ।

स्वररागादिकं सर्वं गीतोपकरणं ततः ।
निरूपितं प्रधानत्वाद्गीतं निरूप्यते ॥ ३५३ ॥

वाग्गेयकारेण कृतं शास्त्रलक्षणसंयुतम् ।
बद्धं धातुभिरङ्गैश्च निबद्धमभिधीयते ॥ ३५४ ॥

आलप्तिर्बन्धहीनत्वा दनिबद्धमितीरितम् ।

(353-354) Music of two kinds: (1) Nibaddha or Prabandha (built up by Dhatus and Angas as laid dawn (2) Anibaddha (free expatiation) or Alapa.

(சு. 353—355) பாட்டில் இருவகை :— (1) நிபத்தம் அல்லது பிரபந்தம் (தாதுக்கள், அங்கங்கள் என்ற பிரிவு களால் தொகுக்கப்பட்டது) (2) அநிபத்தம் (இஷ்டப்படி சஞ்சாரம் செய்தல்) அல்லது ஆலாபனை.

प्रबन्धो रूपकं वस्तु तस्य संज्ञात्रयं भवेत् ॥ ३५५ ॥

अथवा ।

गीतं च रूपकं वस्तु प्रबन्धो गेयमित्यपि ।

गीते पञ्चाभिधाः प्रोक्ताः लक्ष्यदृष्टया विचक्षणैः ३५६ ॥

चतुर्भिर्धातुभिश्चाङ्गैः यस्मादेश प्रयुज्यते ।

तस्मात्प्रबन्धः कथितः गीतज्ञैस्तालकोविदैः ॥ ३५७ ॥

धातुः प्रबन्धावयवः सचोद्ग्राहादिभेदतः ।

चतुर्धा कथितो भागास्त्वाद्य उद्ग्राहसंज्ञकः ॥ ३५८ ॥

आदावुद्गृह्यतेगीतं येनोद्ग्राहस्तदाभवेत् ।

मेलापको द्वितीयस्तूद्ग्राहध्रुवकमेलनात् ॥ ३५९ ॥

ध्रुवत्वाद्ध्रुवसंज्ञस्तु तृतीयो भाग उच्यते ।

आभोगस्त्वन्तिमो भागो गीतपूर्णत्वसूचकः ॥ ३६० ॥

(355-360) The 4 dhatus or parts of a Prabandha :— 'Udgraha' (the beginning) (2) 'Melpaka' (Joining the 1st and 3rd dhatus) (3) 'Dhruva' (the certain or indispensable part) and (4) Abhoga (end)